ग्रं.नं.९८ 3874

संस्कृत **राजवाडे**

अंक ८१४ शाखा पुराण

ग्रंथनाम भागवत - रासक्रीडा

ग्रंथकार

काल पृष्ठ

स्थल

८९०। पृ. ५५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

①

श्रीगणेशाय नमः ॥ श्रीशुक उवाच ॥ भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ॥ वीक्ष्य रंतुं मनश्चक्रे यो
गमायामुपाश्रितः ॥१॥ तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिंपन्नरुणेन शंतमैः ॥ स चर्षणीनामुद
गाच्छुचो मृजन्प्रियः प्रियाया इव दीर्घदर्शनः ॥२॥ दृष्ट्वा कुमुद्वंतमखंडमंडलं रमाननाभं नवकुंकुमारुणं
॥ वनं च तत्कोमलगोभिरंजितं जगौ कलं वामदृशां मनोहरं ॥३॥ निशम्य गीतं तदनंगवर्द्धनं व्रजस्त्रियः
कृष्णगृहीतमानसाः ॥ आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कांतो जवलोलकुंडलाः ॥४॥ दुहंत्योभिय
युः काश्चिद्दोहं हित्वा समुत्सुकाः ॥ पयोधिश्रित्य संयावमनुद्वास्यापरा ययुः ॥५॥ परिवेषयंत्यस्तद्धित्वा
पाययंत्यः शिशून्पयः ॥ शुश्रूषंत्यः पतीन्काश्चिदश्नंत्योपास्य भोजनं ॥६॥ लिंपंत्यः प्रमृजंत्योन्या अंजं
त्यः काश्च लोचने ॥ व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णांतिकं ययुः ॥७॥ ता वार्यमाणाः पतिभिः पितृभि
र्भ्रातृबंधुभिः ॥ गोविंदापहृतात्मानो न न्यवर्तंत मोहिताः ॥८॥ अंतर्गृहगताः काश्चिद्गोप्योलब्धवि
निर्गमाः ॥ कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥९॥ दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ॥ ध्या रामकृ
नप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमंगलाः ॥१०॥ तमेव परमात्मानं जारबुद्ध्यापि संगताः ॥ जहुर्गुण १०

मयंदेहंसद्यःप्रक्षीणबंधनाः ॥११॥ राजोवाच ॥ कृष्णंविदुःपरंकांतंनतुब्रह्मतयामुने ॥ गुणप्रवाहोप
सू रमस्तासांगुणधियांकथं ॥१२॥ श्रीशुकउवाच ॥ उक्तंपुरस्तादेतत्तेचैद्यःसिद्धिंयथागतः ॥ द्विषंनपिहृ
षीकेशंकिमुताधोक्षजप्रियाः ॥१३॥ नृणांनिःश्रेयसार्थायव्यक्तिर्भगवतोनृप ॥ अव्ययस्याप्रमेय
स्यनिर्गुणस्यगुणात्मनः ॥१४॥ कामंक्रोधंभयंस्नेहमैक्यंसौहृदमेवच ॥ नित्यंहरौविदधतोयांतित
न्मयतांहिते ॥१५॥ नचैवंविस्मयःकार्योभवताभगवत्यजे ॥ योगेश्वरेश्वरेकृष्णेयतएतद्विमुच्यते ॥
॥१६॥ तादृष्ट्वांतिकमायाताभगवान्व्रजयोषितः ॥ अवदद्वदतांश्रेष्ठोवाचःपेशैर्विमोहयन् ॥१७॥ श्री
भगवानोवाच ॥ स्वागतंवोमहाभागाःप्रियंकिंकरवाणिवः ॥ व्रजस्यानामयंकच्चिद्ब्रूतागमनकारणं
॥१८॥ रजन्येषाघोररूपाघोरसत्वनिषेविता ॥ प्रतियातव्रजंनेहस्थेहेयंस्त्रीभिःसुमध्यमाः ॥१९॥
मातरःपितरःपुत्राःभ्रातरःपतयश्चवः ॥ विचिन्वंतिह्यपश्यंतोमाकृध्वंबंधुसाध्वसं ॥ विचिन्वंतिह्यप
श्यंतोमिलंराकेशकररंजितं ॥ यमुनानिललीलैजत्तरुपल्लवशोभितं ॥२१॥ तद्यातमाचिरंगोष्ठंशु
श्रूषध्वंपतीन्सतीः ॥ क्रंदंतीवत्साबालाश्चतान्पाययतदुह्यत ॥२२॥ अथवामदभिस्नेहाद्भवत्योयंत्रिता

२

भा॰द॰पू॰ त्राया:।।आगताह्युपपन्नंतत्प्रीयंतेमयिजंतवः।।२३।।भर्तुःशुश्रूषणंस्त्रीणांपरोधर्मोह्यमायया।।तद्बंधूनांचक
२ ल्याणं:प्रजानांचानुपोषणं।।२४।।दुःशीलोदुर्भगोवृद्धोजडोरोग्यधनोपिवा।।पतिस्त्रीभिर्नहंतव्योलोकेप्सु
भिरपातकी।।२५।।अस्वर्ग्यमयसस्यंचफल्गुकृच्छ्रंभयावहं।।जुगुप्सितंचसर्वत्रऔपपत्यंकुलस्त्रियः।।२६।।
श्रवणाद्दर्शनाद्ध्यानान्मयिभावोनुकीर्तनात्।।नतथासन्निकर्षेणप्रतियाततनोगृहान्।।२७।।श्रीशुक
उवाच।।इतिविप्रियमाकर्ण्यगोप्योगोविंदभाषितं।।विषण्णाभग्नसंकल्पाश्चिंतामापुर्दुरत्ययां।।२८।।कृ
त्वामुखान्यवशुचःश्वसनेनशुष्यद्बिंबाधराणिचरणेनभुवंलिखंत्यः।।अस्रैरुपात्तमषिभिःकुचकुंकु
मानितस्थुर्मृजंत्यउरुदुःखभराःस्मतूष्णीं।।२९।।प्रेष्ठंप्रियेतरमिवप्रतिभाषमाणंकृष्णंतदर्थविनिवर्तित
सर्वकामाः।।नेत्रेविमृज्यरुदितोपहतेस्मकिंचित्संरंभगद्गदगिरोब्रुवतानुरक्ताः।।३०।।गोप्यऊचुः।।मैवं
विभोर्हतिभवान्गदितुंनृशंसंसंत्यज्यसर्वविषयांस्तवपादमूलं।।भक्ताभजस्वदुरवग्रहमात्यजास्मा
न्देवोयथादिपुरुषोभजतेमुमुक्षून्।।३१।।यत्पत्यपत्यसुहृदामनुवृत्तिरंगस्त्रीणांस्वधर्मइतिधर्मविदात्व राम॰
योक्तं।।यस्त्वेवमेतदुपदेशपदेत्वयीशोप्रेष्ठोभवांस्तनुभृतांकिलबंधुरात्मा।।३२।।कुर्वंतिहित्वयिरतिंकुश २

2A

लास्वआत्मन्नित्यं प्रियेपतिसुतादिभिरार्तिदैः किं ॥ तन्नः प्रसीदपरमेश्वरमास्मछिंदिदाशांधृतांत्वयि
चिरादरविंदनेत्र ॥ ३३ ॥ चित्तंसुखेनभवतापहृतंगृहेषुयन्निर्विशत्युतकरावपिगृह्यकृत्ये ॥ पादौपदंन
चलतस्तवपादमूलाद्यामः कथंब्रजमथोकरवामकिंवा ॥ ३४ ॥ सिंचांगनस्त्वदधरामृतपूरकेणहासावलो
ककलगीतजहृच्छयाग्निं ॥ नोचेद्वयंविरहजाग्न्युपयुक्तदेहाध्यानेनयामपदयोःपदवींसखेते ॥ ३५ ॥ य
र्ह्यंबुजाक्षतवपादतलंरमायादत्तक्षणंक्वचिदरण्यजनप्रियस्य ॥ अस्प्राक्ष्मतत्प्रभृतिनान्यसमक्षमंग
स्थातुंत्वयाभिरमितावतपारयामः ॥ ३६ ॥ श्रीर्यत्पदांबुजरजश्चकमेतुलस्यालब्ध्वापिवक्षसिपदंकिलभृ
त्यजुष्टं ॥ यस्याःस्ववीक्षणकृतेन्यसुरप्रयासस्तद्वद्वयंचतवपादरजःप्रपन्नाः ॥ ३७ ॥ तन्नःप्रसीदवृजिना
र्दनतेंघ्रिमूलंप्राप्ताविसृज्यवसतीस्त्वदुपासनाशाः ॥ त्वत्सुंदरस्मितनिरीक्षणतीव्रकामतप्तात्मनांपुरु
षभूषणदेहिदास्यं ॥ ३८ ॥ वीक्ष्यालकावृतमुखंतवकुंडलश्रीगंडस्थलाधरसुधंहसितावलोकं ॥ दत्ताभयं
चभुजदंडयुगंविलोक्यवक्षःश्रियैकरमणंचभवामदास्यः ॥ ३९ ॥ कास्त्र्यंगतेकलपदामृतवेणुगीतसं
मोहितार्यचरितान्नचलेत्रिलोक्यां ॥ त्रैलोक्यसौभगमिदंचनिरीक्ष्यरूपंयद्गोद्विजद्रुममृगाःपुलका

न्यबिभ्रन्॥४०॥व्यक्तंभवान्व्रजभयार्तिहरोभिजातोदेवोयथादिपुरुषःसुरलोकगोप्ता॥तन्नोनिधेहिक
रपंकजमार्तबंधोतप्तस्तनेषुचशिरःसुचकिंकिणीनां॥४१॥श्रीशुकउवाच॥इतिविक्लवितंतासांश्रुत्वायोगे
श्वरेश्वरः॥प्रहस्यसदयंगोपीरात्मारामोप्यरीरमत्॥४२॥ताभिःसमेताभिरुदारचेष्टितःप्रियेक्षणोत्फुल्लमु
खीभिरच्युतः॥उदारहासद्विजकुंददीधितिर्व्यरोचतैणांकइवोडुभिर्वृतः॥४३॥उपगीयमानउद्गायन्वनिता
शतयूथपः॥मालांबिभ्रद्वैजयंतींव्यचरन्मंडयन्वनं॥४४॥नद्याःपुलिनमाविश्यगोपीभिर्हिमवालु
कं।रेमेतत्तरलानंदकुमुदामोदवायुना॥४५॥बाहुप्रसारपरिरंभकरालकोरुनीवीस्तनालभननर्मनखा
ग्रपातैः॥क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्रतिपतिंरमयांचकार॥४६॥एवंभगवतःकृष्णाल्लब्ध
मानामहात्मनः॥आत्मानंमेनिरेस्त्रीणांमानिन्योभ्यधिकंभुवि॥४७॥तासांतत्सौभगमदंवीक्ष्यमानं
चकेशवः॥प्रशमायप्रसादायतत्रैवांतरधीयत॥४८॥ ॥इतिश्रीमद्भागवतेदशमस्कंधेमहापुराणेभ
गवतोबालचरितवर्णनंनामैकोनत्रिंशोध्यायः॥श्रीशुकउवाच॥अंतर्हितेभगवतिसहसैवव्रजांगना रामः
ः॥अतप्यंस्तमचक्षाणाःकरिण्यइवयूथपं॥१॥गत्यानुरागस्मितविभ्रमेक्षितैर्मनोरमालापविहारवि ३

3A

भ्रमैः॥आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः॥२॥गति स्मित प्रेक्षण भाषणादिषु
प्रियाः प्रियस्य प्रतिरूढमूर्तयः॥असावहं त्वित्यबलास्तदात्मिका न्यवेदिषुः कृष्णविहारविभ्रमाः॥३॥गा
यंत्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनं॥पप्रच्छुराकाशवदंतरं बहिर्भूतेषु संतं पुरुषं वनस्पतीन्
॥४॥दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः॥नंदसूनुर्गतो हृत्वा प्रेमहासावलोकनैः॥५॥कच्चित्कुरब
काशोक नाग पुन्नाग चंपकाः॥६॥रमानुजो मानिनीनां गतो दर्पहर स्मितः॥कच्चित्तुलसि कल्याणि गोविं
चरणप्रिये॥सहत्वालिकुलैर्बिभ्रद्दृष्टस्तेतिप्रियोऽच्युतः॥७॥मालत्यदर्शि वः कच्चिन्मल्लिके जातियूथि
के॥प्रीतिं वो जनयन्यातः करस्पर्शेन माधवः॥८॥चूतप्रियालपनसासनकोविदारजंबर्कबिल्वबकुलाम्र
कदंबनिंबाः॥येन्ये परार्थभविका यमुनोपकूलाः शंसंतु कृष्णपदवीं रहितात्मनां नः॥९॥किं ते कृतं क्षितित
पो बत केशवांघ्रिस्पर्शोत्सवोत्पुलकितांगरुहैर्विभासि॥अप्यंघ्रिसंभव उरुक्रमविक्रमाद्वा आहो वराहवपु
तू षः परिरंभणेन॥१०॥अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन्दृशां सखि सुनिर्वृतिमच्युतो वः॥कांतांग
संगकुचकुंकुमरंजितायाः कुंदस्रजः कुलपतेरिह वाति गंधः॥११॥बाहुं प्रियांस उपधाय गृहीतपद्मो
रामानुजस्तुलसिकालिकुलैर्मदांधैः॥अन्वीयमान इह वस्तरवः प्रणामं किं वाभिनंदति चरन्प्रणयावलो

Joint Project of Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai.

८

भा·द·प·रा· कैः ॥१२॥ पृछतेमालताबाहूनप्याश्लिष्टावनस्पतेः ॥ नूनंतत्करजस्पृष्टाबिभ्रत्युत्पुलकान्यहो ॥१३॥ इत्युन्मत्तव
४ चोगोप्यः कृष्णान्वेषणकातराः ॥ लीलाभगवतस्तास्ताह्यनुचक्रुस्तदात्मिकाः ॥१४॥ कास्याश्चित्पूतनायंत्याःकृष्णा
यंत्यपिबत्स्तनम् ॥ तोकयित्वारुदंत्यन्यापदाहन्शकटायती ॥१५॥ दैत्यायित्वाजहारान्यामेकाकृष्णार्भभाव
नां ॥ रिंगयामासकाप्यंघ्रीकर्षतीघोषनिस्वनैः ॥१६॥ कृष्णरामायितेद्वेतुगोपायंत्यश्चकाश्चन ॥ वत्सायतीघ्न
तीचान्यातत्रैकातुबकायती ॥१७॥ आहूयदूरगायद्वत्कृष्णस्तमनुकुर्वती ॥ वेणुंक्वणंतीक्रीडंतीअन्याःशंसंति
साध्विति ॥१८॥ कस्यांश्चित्स्वभुजंन्यस्यचलंत्याहापरानुनु ॥ कृष्णोहंपश्यतगतिंललितामितितन्मनाः ॥१९॥
माभैष्टवातवर्षाभ्यांतत्त्राणंविहितंमया ॥ इत्युक्त्वैकेनहस्तेनयतंत्युन्निदधेंबरं ॥२०॥ आरुह्यैकाप
दाक्रम्यशिरस्याहापरान्नृप ॥ दुष्टाहेगच्छजातोहंखलानांनुनुदंडधृक् ॥२१॥ तत्रैकोवाचहेगोपा
दावाग्निंपश्यतोल्बणं ॥ चक्षूंष्याश्वपिदध्वंवोविधास्येक्षेममंजसा ॥२२॥ बध्वान्ययास्रजाकाचि
त्तन्वीतत्रउलूखले ॥ भीतासुदृक्पिधायास्यंभेजेभीतिविडंबनं ॥२३॥ एवंकृष्णंपृछमानावृंदावन राम॥
लतास्तरून् ॥ व्यचक्षतवनोद्देशेपदानिपरमात्मनः ॥२४॥ पदानिव्यक्तमेतानिनंदसूनोर्महात्मनः ॥ ४

लक्ष्यंतेहिध्वजांभोजवज्रांकुशयवादिभिः ॥२५॥ तैस्तैः पदैस्तत्पदवीमन्विच्छंत्योग्रतो बलाः ॥ बध्वाः पदैः सुपृक्तानि
विलोक्यार्त्ताः समब्रुवन् ॥२६॥ कस्याः पदानि चैतानि यातायानंदसूनुना ॥ अंसन्यस्तप्रकोष्ठायाः करेणोः करि
णायथा ॥२७॥ अनयाराधितोनूनं भगवान्हरिरीश्वरः ॥ यन्नोविहाय गोविंदः प्रीतोयामनयद्रहः ॥२८॥ धन्या
अहो अमी आल्यो गोविंदांघ्र्यब्जरेणवः ॥ यान्ब्रह्मेशौ रमादेवी दधुर्मूर्ध्न्यघनुत्तये ॥२९॥ तस्या अमूनि नः
क्षोभं कुर्वंत्युच्चैः पदानि यत् ॥ यैकापहृत्य गोपीनां रहो भुंक्तेऽच्युताधरं ॥३०॥ न लक्ष्यंते पदान्यत्र तस्या नूनं तृणांकु
रैः ॥ खिद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं प्रियः ॥३१॥ इमान्यधिकमग्नानि पदानि वहतो वधूं ॥ गोप्यः पश्यत कृ
ष्णस्य भाराक्रांतस्य कामिनः ॥३२॥ अत्रावरोपिता कांता पुष्पहेतोर्महात्मना ॥ अत्र प्रसूनावचयः प्रियार्थे प्रेय
सा कृतः ॥३३॥ प्रपदाक्रमणे एते पश्यतासकले पदे ॥ केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतं ॥३४॥ ता
नि चूडयता कांतामुपविष्टमिह ध्रुवं ॥ रेमे तया चात्मरत आत्मारामोप्यखंडितः ॥ का॥ मिन्यां दर्शयन्दैन्यं
स्त्रीणां चैव दुरात्मतां ॥ इत्येवं दर्शयंत्यस्ताश्चेरुर्गोप्यो विचेतसः ॥३६॥ यां गोपीमनयत्कृष्णो विहायान्याः
स्त्रियो वने ॥ सा च मेने तदात्मानं वरिष्ठं सर्वयोषितां ॥३७॥ हित्वा गोपीः कामयाना मामसौ भजते प्रियः ॥

ततोगत्वावनोद्देशंदृप्ताकेशवमब्रवीत॥३८॥नपारयेहंचलितुंनयमांयत्रतेमनः॥एवमुक्तः प्रियामाहस्कंधमारुह्यता
मिति॥३९॥ततश्चांतर्दधेकृष्णःसावधूरन्वतप्यत॥हानाथरमणप्रेष्टक्वासिक्वासिमहाभुज॥४०॥दास्यास्तेकृपणायामे
सखेदर्शयसंनिधिं॥श्रीशुकउवाच॥अन्विछंत्योभगवतोमार्गंगोप्याविदूरतः॥४१॥ददृशुःप्रियविश्लेषमोहितांदुः
खितांसखीं॥तयाकथितमाकर्ण्यमानप्राप्तिंचमाधवात्॥४२॥ततोविशन्वनंचंद्रज्योत्स्नायावद्विभाव्यते॥तमःप्रविष्ट
मालक्ष्यततोनिववृतुस्त्रियः॥४३॥तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः॥तद्गुणानेवगायंत्योनात्मागा
राणिसस्मरुः॥४४॥पुनःपुलिनमागत्यकालिंद्याःकृष्णभावनाः॥समवेताजगुःकृष्णंतदागमनकांक्षिताः॥४५॥
इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेरासक्रीडायांत्रिंशत्तमोध्यायः॥श्रीशुकउवाच॥गोप्यऊचुः॥जयतिते
धिकंजन्मनाव्रजःश्रयतइंदिराशश्वदत्रहि॥दयितदृश्यतांदिक्षुतावकास्त्वयिधृतासवस्त्वांविचिन्वते॥१॥शरदु
दाशयेसाधुजातसत्सरसिजोदरश्रीमुषादृशा॥सुरथनाथतेःशुल्कदासिकावरदनिघ्नतोनेहकिंवधः॥२॥वि
षजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात्॥वृषमयात्मजाद्विश्वतोभयादृषभतेवयंरक्षितामुहुः॥३॥ रामः
नखलुगोपिकानंदनोभवानखिलदेहिनामंतरात्मदृक्॥विखनसार्थितोविश्वगुप्तयेसखउदेयिवान्सात्वतां ५

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

5A

कुले ॥ ४ ॥ विरचिताभयंवृष्णिधुर्यतेचरणमीयुषांसंसृतेर्भयात् ॥ करसरोरुहंकांतकामदंशिरसिधेहिनःश्रीकरग्र
हं ॥ ५ ॥ व्रजजनार्त्तिहन्वीरयोषितांनिजजनस्मयाध्वंसिनस्मित ॥ भजसखेभवत्किंकरीःस्मनोजलरुहाननंचा
रुदर्शनं ॥ ६ ॥ प्रणतदेहिनांपापकर्षणंतृणचरानुगंश्रीनिकेतनं ॥ फणिफणार्पितंतेपदांबुजंकृणुकुचेषुनःकृंधि
हृच्छयं ॥ ७ ॥ मधुरयागिरावल्गुवाक्ययाबुधमनोज्ञयापुष्करेक्षण ॥ विधिकरीरिमावीरमुह्यतीरधरसीधुना
प्याययस्वनः ॥ ८ ॥ तवकथामृतंतप्तजीवनंकविभिरीडितंकल्मषापहं ॥ श्रवणमंगलंश्रीमदाततंभुविगृणंति
तेभूरिदाजनाः ॥ ९ ॥ प्रहसितंप्रियप्रेमवीक्षणंविहरणंचतेध्यानमंगलं ॥ रहसिसंविदोयाहृदिस्पृशःकुहकंमनः नो
क्षोभयंतिहि ॥ १० ॥ चलसियद्व्रजाच्चारयन्पशून्नलिनसुंदरंनाथतेपदं ॥ शिलतृणांकुरैःसीदतीतिनःकलिल
तामनःकांतगच्छति ॥ ११ ॥ दिनपरीक्षयेनीलकुंतलैर्वनरुहाननंबिभ्रदावृतं ॥ घनरजःस्वलंदर्शयन्मुहुर्मनसि
नःस्मरंवीरयच्छसि ॥ १२ ॥ प्रणतकामदंपद्मजार्चितंधरणिमंडलंध्येयमापदि ॥ चरणपंकजंशंतमंचतेरमणनः
स्तनेष्वर्पयाधिहं ॥ १३ ॥ सुरतवर्द्धनंशोकनाशनंस्वरितवेणुनासुष्टुचुंबितं ॥ इतररागविस्मारणंनृणांवितर
वीरनस्तेधरामृतं ॥ १४ ॥ अटतियद्भवानह्निकाननंत्रुटियुगायतेत्वामपश्यतां ॥ कुटिलकुंतलंश्रीमुखंचते

६
भा॰द॰रा॰पं॰ जडउदीक्षतां पक्ष्मकृद्दृशां ॥१५॥ पतिसुतान्वयभ्रातृबांधवानतिविलंघ्यतेह्यच्युतागताः ॥ गतिविदस्तवोद्गीतमोहि
६ ताः कितवयोषितः कस्त्यजेन्निशि ॥१६॥ रहसिसंविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणं ॥ बृहदुरःश्रियो धाम वीक्ष्य ते
ह मुहुरतिस्पृहा मुह्यते मनः ॥१७॥ व्रजवनौकसां व्यक्तिरंग ते वृजिनहंत्र्यलं विश्वमंगलं ॥ त्यज मनाक्च नस्त्वत्स्पृहात्मना स्वज
नहृद्रुजां यन्निषूदनम् ॥१८॥ यत्ते सुजातचरणांबुरुहं स्तनेषु भीताः शनैः प्रियदधीमहि कर्कशेषु ॥ तेनाटवीमटसि तद्व्य
थते न किंस्वित्कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥१९॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे गोपीकृतकृष्णस्तुति
श्र र्नामैकत्रिंशोध्यायः ॥ श्रीशुकउवाच ॥ इति गोप्यः प्रगायंत्यः प्रलपंत्यश्च चित्रधा ॥ रुरुदुः सुस्वरं राजन्कृष्णदर्शन
लालसाः ॥१॥ तासामाविरभूच्छौरिः स्मयमानमुखांबुजः ॥ पीतांबरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥२॥ तं
विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोबलाः ॥ उत्तस्थुर्युगपत्सर्वास्तन्वः प्राणमिवागतं ॥३॥ काचित्करांबुजं शौरे
र्जगृहेंजलिनामुदा ॥ काचिद्दधार तद्बाहुमंसे चंदनभूषितम् ॥४॥ काचिदंजलिनागृह्णात्तन्वी तांबूलचर्वि
तं ॥ एका तदंघ्रिकमलं संतप्ता स्तनयोरधात् ॥५॥ एका भ्रुकुटिमाबध्य प्रेमसंरंभविह्वला ॥ घ्नंतीवैक्षत्कटा रामः
क्षपैः संदष्टदशनच्छदा ॥६॥ अपरानिमिषद्दृग्भ्यां जुषाणा तन्मुखांबुजं ॥ आपीतमपि नातृप्यत्संतस्तच्च ६

6A

रणंयथा॥७॥तंकाचिन्नेत्ररंध्रेणहृदिकृत्यनिमील्यच॥पुलकांग्युपगुह्यास्तेयोगीवानंदसंप्लुता॥८॥सर्वा
स्ताःकेशवालोकपरमोत्सवनिर्वृताः॥जहुर्विरहजंतापंप्राज्ञंप्राप्ययथाजनाः॥९॥ताभिर्विधूतशोकाभिर्भग
वानच्युतोवृतः॥व्यरोचताधिकंतातपुरुषश्शक्तिभिर्यथा॥१०॥ताःसमादायकालिंद्यानिर्विश्यपुलिनंविभुः
॥विकसत्कुंदमंदारसुरभ्यनिलषट्पदं॥११॥शरच्चंद्रांशुसंदोहध्वस्तदोषातमःशिवं॥कृष्णायाहस्ततरला
चितकोमलवालुकं॥१२॥तद्दर्शनाह्लादविधूतहृद्रुजोमनोरथांतंश्रुतयोयथाययुः॥स्वैरुत्तरीयैःकुचकुंकु
मांकितैरचीक्लृपन्नासनमात्मबंधवे॥१३॥तत्रोपविष्टोभगवान्सईश्वरोयोगेश्वरांतर्हृदिकल्पितासनः
चकासगोपीपरिषद्गतोर्चितस्त्रैलोक्यलक्ष्म्येकपदंवपुर्दधत्॥१४॥सभाजयित्वातमनंगदीपनंसहास
लीलेक्षणविभ्रमभ्रुवा॥संस्पर्शनेनांककृतांघ्रिहस्तयोःसंस्तुत्यईषत्कुपिताबभाषिरे॥१५॥गोप्यऊचुः
॥भजतोनुभजंत्येकएकएतद्विपर्ययं॥नोभयांश्चभजंत्येकएतन्नोब्रूहिसाधुभो॥१६॥श्रीभगवानोवाच॥मि
थोभजंतियेसख्यःस्वार्थैकांतोद्यमाहिते॥नतत्रसौहृदंधर्मःस्वार्थार्थंतद्धिनान्यथा॥१७॥भजंत्यभजतोये
वैकरुणाःपितरोयथा॥धर्मोनिरपवादोत्रसौहृदंचसुमध्यमाः॥१८॥भजतोपिनवैकेचिद्भजंत्यभज

भा॰द॰रा॰पं॰ तःकृतः॥ आत्मारामाह्याप्तकामा अकृतज्ञागुरुद्रुहः॥१९॥ नाहंतु सख्यो भजतोपि जंतून्भजाम्यमीषामनुवृत्ति
७ वृत्तये॥ यथाधनोलब्धधनेविनष्टेतच्चिंतयान्यंनिभृतोनवेद॥२०॥ एवंमदर्थोज्झितलोकवेदस्वानांहिवोम
य्यनुवृत्तयेबलाः॥ मयापरोक्षंभजतातिरोहितंमासूयितुंमार्हथतत्प्रियंप्रियाः॥२१॥ नपारयेहंनिरवद्य
संयुजांस्वसाधुकृत्यंविबुधायुषापिवः॥ यामाभजन्दुर्जरगेहशृंखलाःसंवृश्च्यतद्वःप्रतियातुसाधुना
॥२२॥ इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेद्वात्रिंशोध्यायः॥ श्रीशुकउवाच॥ इत्थंभगवतोगोप्यः
श्रुत्वावाचःसुपेशलाः॥ जहुर्विरहजंतापंतदंगोपचिताशिषः॥१॥ तत्रारभतगोविंदोरासक्रीडामनु
व्रतैः॥ स्त्रीरत्नैरन्वितःप्रीतैरन्योन्याबद्धबाहुभिः॥२॥ रासोत्सवःसंप्रवृत्तोगोपीमंडलमंडितः॥ योगे
श्वरेणकृष्णेनतासांमध्येद्वयोर्द्वयोः॥३॥ प्रविष्टेनगृहीतानांकंठेस्वनिकटंस्त्रियः॥ यंमन्येरन्नभस्ताव
द्विमानशतसंकुलं॥४॥ दिवौकसांसदाराणांमौत्सुक्यापहृतात्मनां॥ ततोदुंदुभयोनेदुर्निपेतुःपुष्प
वृष्टयः॥५॥ जगुर्गंधर्वपतयःसस्त्रीकास्तद्यशोमलं॥ वलयानांनूपुराणांकिंकिणीनांचयोषितां राम॰
॥६॥ सप्रियाणामभूच्छब्दस्तुमुलोरासमंडले॥ तत्रातिशुशुभेताभिर्भगवान्देवकीसुतः॥७॥ मध्ये ७

मणीनां हैमानां महामरकतो यथा ॥८॥ पादान्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चल
कुचपटैः कुंडलैर्गंडलोलैः ॥ स्विद्यन्मुख्यः कबररसनाग्रंथयः कृष्णवध्वो गायंत्यस्तं तडित इव ता मेघचक्र
के विरेजुः ॥९॥ उच्चैर्जगुर्नृत्यमाना रक्तकंठ्यो रतिप्रियाः ॥ कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतं ॥१०॥
काचित्समं मुकुंदेन स्वरजातीरमिश्रिताः ॥ उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति ॥११॥ तदेव ध्रुवमुन्
निन्ये तस्यै मानं च बह्वदात् ॥ काचिद्रासपरिश्रांता पार्श्वस्थस्य गदाभृतः ॥१२॥ जग्राह बाहुना स्कंधं श्लथद्व
लयमल्लिका ॥ तत्रैकांसगतं बाहुं कृष्णस्योत्पलसौरभं ॥१३॥ चंदनालिप्तमाघ्राय हृष्टरोमा चुचुंब ह ॥ कस्या
श्चिन्नाट्यविक्षिप्तकुंडलत्विषमंडितं ॥१४॥ गंडं गंडे संदधत्या अदात्तांबूलचर्वितं ॥ नृत्यती गायती काचित्कूज
न्नूपुरमेखला ॥१५॥ पार्श्वस्थाच्युतहस्ताब्जं श्रांताधात्स्तनयोः शिवं ॥ गोप्यो लब्ध्वाच्युतं कांतं श्रिय एकांतवल्ल
भं ॥१६॥ गृहीतकंठ्यस्तद्दोर्भ्यां गायंत्यस्तं विजह्रिरे ॥१७॥ कर्णोत्पलालकविटंककपोलघर्मवक्त्रश्रियो वलयनूपु
रघोषवाद्यैः ॥ गोप्यः समं भगवता ननृतुः स्वकेशस्रस्तस्रजो भ्रमरगायकरासगोष्ठ्यां ॥१८॥ एवं परिष्वंगकराभिम
र्शस्निग्धेक्षणोद्दामविलासहासैः ॥ रेमे रमेशो व्रजसुंदरीभिर्यथार्भकः स्वप्रतिबिंबविभ्रमः ॥१९॥ तदंगसंगप्रमुदा

8

तानि पुण्यानि तत्कररुहस्पर्शप्रमोदाः ॥२४॥ ×५

भा॰ द॰ रा॰ पं॰ कुलेंद्रियाः केशान्दुकूलं कुचपट्टिकां वा ॥ नांजः प्रतिव्योढुमलं व्रजस्त्रियो विस्रस्तमालाभरणाः कुरुद्वह ॥२०॥ कृ
८ ष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः ॥ कामार्दिताः शशांकश्च सगणो विस्मितो भवत् ॥२१॥ कृत्वा तावंतमात्मानं
यावती गोपियोषितः ॥ रेमे स भगवांस्ताभिरात्मारामोपि लीलया ॥२२॥ तासां रतिविहारेण श्रांतानां वदनानि सः
॥ प्रामृजत्करुणः प्रेम्णा शंतमेनांगपाणिना ॥२३॥ गोप्यः स्फुरद्कुंडलत्विड्गंडश्रिया सुधितहासनिरीक्षणेन ॥
मानं दधत्य ऋषभस्य जगुः कृ ताभिर्युतः श्रममपोहितुमंगसंगघृष्टस्रजः स कुचकुंकुमरंजितायाः ॥ गंधर्वपा
लिभिरनुद्रुत आविशद्वाः श्रांतो गजीभिरिभराडिव भिन्नसेतुः ॥२५॥ सोंभस्यलं युवतिभिः परिषिच्यमानः प्रेम्णे
क्षितः प्रहसतीभिरितस्ततोंग ॥ वैमानिकैः कुसुमवर्षिभिरीड्यमानो रेमे स्वयं स्वरतिरत्र गजेंद्रलीलः ॥२६॥ तत
कृष्णोपवने जलस्थलप्रसूनगंधानिलजुष्टदिक्तटे ॥ चचार भृंगप्रमदागणावृतो यथा मदच्युद्द्विरदः करेणुभि
ः ॥२७॥ एवं शशांकांशुविराजिता निशाः स सत्यकामोऽनुरताबलागणः ॥ सिषेव आत्मन्यवरुद्धसौरतः स
र्वाः शरत्काव्यकथारसाश्रयाः ॥२८॥ राजोवाच ॥ संस्थापनाय धर्मस्य प्रशमायेतरस्य च ॥ अवतीर्णो हि भग
वानंशेन जगदीश्वरः ॥२९॥ स कथं धर्मसेतूनां वक्ता कर्ताभिरक्षिता ॥ प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्शनं ॥३०॥ रामप॰
आप्तकामो यदुपतिः कृतवान्वै जुगुप्सितं ॥ किमभिप्राय एतन्नः संशयं छिंधि सुव्रत ॥३१॥ श्रीशुक उवाच ॥ ८

धर्मव्यतिक्रमोदृष्टईश्वराणांचसाहसं॥ तेजीयसांनदोषायवह्नेःसर्वभुजोयथा॥३२॥ नैतत्समाचरे
ज्जातुमनसापिह्यनीश्वरः॥ विनश्यत्याचरन्मौढ्याद्यथारुद्रोब्धिजंविषं॥३३॥ ईश्वराणांवचःस
त्यंतथैवाचरितंक्वचित्॥ तेषांयत्स्ववचोयुक्तंबुद्धिमांस्तत्समाचरेत्॥३४॥ कुशलाचरितेनै
षामिहस्वार्थोनविद्यते॥ विपर्ययेणवानर्थोनिरहंकारिणांप्रभो॥३५॥ किमुताखिलसत्वानांतिर्य
ङ्मर्त्यदिवौकसां॥ ईशितुश्चेशितव्यानांकुशलाकुशलान्वयः॥३६॥ यत्पादपंकजपरागनिषेवतृ
प्तायोगप्रभावविधुताखिलकर्मबंधाः॥ स्वैरंचरंतिमुनयोपिननह्यमानास्तस्येछयात्तवपुषःकु
तएवबंधः॥३७॥ गोपीनांतत्पतीनांचसर्वेषामेवदेहिनां॥ योंतश्चरतिसोध्यक्षःक्रीडनेनेहदेहभा
क्॥३८॥ अनुग्रहायभूतानांमानुषंदेहमास्थितः॥ भजतेतादृशीःक्रीडायाःश्रुत्वातत्परोभवेत्॥३९
नासूयन्खलुकृष्णायमोहितास्तस्यमायया॥ मन्यमानाःस्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः॥
॥४०॥ ब्रह्मरात्रमुपावृत्तेवासुदेवानुमोदिताः॥ अनिच्छंत्योययुर्गोप्यःस्वगृहान्भगवत्प्रियाः॥४१॥ विक्री
डितंव्रजवधूभिरिदंचविष्णोःश्रद्धान्वितोनुशृणुयादथवर्णयेद्यः॥ भक्तिंपरांभगवतिप्रतिलभ्यकामंहृद् रासप ९
रोगमाश्वपहिनोत्यचिरेणधीरः॥४२॥ श्रीभागवतेमहापुराणेदशमस्कंधेत्रयस्त्रिंशोध्यायः॥श्री॥

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com